Sadashivam
International Research Journal of Sanskrit Shastras
:: Published by ::
Shree Sadashiva Campus, Puri, Odisha
Rashtriya Sanskrit Sansthan, Deemed University under MHRD Govt. of India

अष्टाध्याय्याः सूत्राणां प्रकाराः

डॉ. यशस्वी
सहाचार्यः, व्याकरणविभागः
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

शोधसारांशः –

पाणिनीयव्याकरणं अष्टाध्यायी वा सूत्रेषूनिबद्धं सत् संस्कृतभाषायाः व्याकरणेषूपलब्धेषु इतरेषु अग्रगण्यं व्याकरणमिव राराजते। तत्र समग्रम् अष्टाध्याय्यां नवप्रकारकाणि सूत्राणि उपायुञ्जन्त। तेषां नवप्रकारकारकाणां संज्ञा-परिभाषा-विधि-नियम-अतिदेश-अधिकार-निषेध-विकल्प-निपातनाख्यानां सूत्राणां परिचयः प्रकृते शोधलेखे प्रदर्शितः।

कूटसंकेतः –

अष्टाध्यायी, संज्ञासूत्र, परिभाषासूत्र, विधिसूत्र, नियमसूत्र, अतिदेशसूत्र।

अष्टाध्याय्याः सूत्राणां प्रकाराः

परिचयः

अष्टाध्यायीकारः साधुशब्दानां प्रकृतिप्रत्ययादिविभागार्थं तत्रादेशादिविधानार्थञ्च अष्टाध्यायीस्थसूत्राणि नवप्रकारकाणि विरचयाम्बभूव। तादृशसूत्राणां नामानीमानि सन्ति – १. संज्ञासूत्राणि २. परिभाषासूत्राणि ३. विधिसूत्राणि ४. नियमसूत्राणि ५. अतिदेशसूत्राणि ६. अधिकारसूत्राणि ७. निषेधसूत्राणि ८. विकल्पसूत्राणि ९. निपातसूत्राणि। एते च प्रकारा एकैकशोऽग्रे व्याख्यायन्ते।

1. संज्ञासूत्राणि

तत्र सङ्केतितार्थबोधकं संज्ञासूत्रम्। यः शब्दः स्वेन सङ्केतितमर्थं बोधयति सा संज्ञा। गौरिति संज्ञाशब्दः उच्चारितस्सन् स्वेन सङ्केतितं ककुदखुरविषाणवन्तं प्राणिनं बोधयति। तद्वदेव अष्टाध्याय्यामपि सूत्रकारेण "वृद्धिरादैच्"[1] "अदेङ् गुणः"[1] इत्येवमादिभिस्सूत्रैः संज्ञाप्रकरणं क्रियते। लोके व्यवहारदर्शनेन तत्तच्छब्दविशेषस्य तत्तदर्थविशेषे सङ्केतो गृह्यते। अष्टाध्याय्यां तु सूत्रकारेण निश्चितोऽर्थ एव गृह्यते। यथा वृद्धिशब्दः लोके वर्धनार्थे रूढः। अत्र तु "वृद्धिरादैच्" इति सूत्रेण आ-ऐ-औ इत्येतेषु वर्णेषु वृद्धिशब्दस्य सङ्केतः कृतः सूत्रकारेण। सा च संज्ञा अन्वितार्थ-अनन्वितार्थ-अन्वितानन्वितार्थ-अर्थनिबन्धनभेदेन चतुर्धा।

1.1 अन्वितार्थसंज्ञा

या संज्ञा संज्ञिनं (सङ्केतितार्थं) बोधयित्वापि किञ्चिद्विशिष्टं तात्पर्यं बोधयति सा अन्वितार्थसंज्ञा (अन्वर्थसंज्ञा)। यथा – "सर्वादीनि सर्वनामानि"[1]। सूत्रेणैतेन सर्वादिगणपठितानां शब्दानां सर्वनामसंज्ञा विधीयते। संज्ञामिमां निमित्तीकृत्य "सर्वनाम्नः स्मै"[1] इत्यादिभिस्सूत्रैः सर्वस्मै इत्यादिरूपाणि सिद्ध्यन्ति। इह व्याकरणशास्त्रे सूत्राणां लाघवार्थम् अध्येतृणां लाघवेन प्रतिपत्त्यर्थञ्च टि, घु, घ, भ, इत्यादिसंज्ञाः क्रियन्ते। तद्वदेव प्रकृतसूत्रेऽपि लघीयस्यैव संज्ञया अभीष्टार्थे सिद्धे महत्यास्संज्ञायाः करणे एतत्प्रयोजनं यदियं संज्ञा अन्वितार्थसंज्ञा यथा स्यात्। एवञ्च सर्वादिशब्दानां यौगिकार्थस्वीकारे एव सर्वनामसंज्ञा न तु रूढ्यर्थस्वीकारे गौणार्थस्वीकारे वा। अत एव यदा सर्वशब्दः सकलार्थवाचकः (यौगिकार्थवाचकः), तदा तस्य सर्वनामसंज्ञायां सर्वस्मै इत्यादिरूपम्। यदा तु सः कस्यचिन्मनुष्यस्य संज्ञात्वेन रूढस्सन् सकलरूपमर्थन्न बोधयति, अथवा सर्वमतिक्रान्तः = अतिसर्वः इत्यादौ गौणरूपेण सकलार्थं बोधयति; न तदा तस्य सर्वनामसंज्ञा। तदा तु 'सर्वाय देहि, अतिसर्वाय देहि' इत्याद्येव रूपम्।

तदुक्तं भाष्ये – "अथवा महतीयं संज्ञा क्रियते। संज्ञा च नाम यतो न लघीयः। कुत एतत् ? लघ्वर्थं हि संज्ञाकरणम्। तत्र महत्याः संज्ञायाः करणे एतत्प्रयोजनम् – अन्वर्थसंज्ञा यथा विज्ञायेत सर्वादीनि सर्वनामसंज्ञानि भवन्ति। सर्वेषां नामानीति चातः सर्वनामानि। संज्ञोपसर्जने च विशेषेऽवतिष्ठते"[1] इति।

1.2. अनन्वितार्थसंज्ञा (कृत्रिमा संज्ञा)

यया संज्ञया सूत्रकारेण सङ्केतितस्यैवार्थस्य ग्रहणम्, न तु लोकप्रसिद्धार्थस्य, सा अनन्वितार्थसंज्ञा। यथा– "यू स्त्र्याख्यौ नदी"[1] इति। अत्र ईकारान्तस्य ऊकारान्तस्य च स्त्रीवाचकशब्दस्य नदीति कृत्रिमा संज्ञा क्रियते। संज्ञामिमां निमित्तीकृत्य "आण्नद्याः"[1] इत्यादिभिः सूत्रैः 'कुमार्यै' इत्यादिरूपाणि सिद्ध्यन्ति।

1.3 अन्वितानन्वितार्थसंज्ञा

यया संज्ञया लोकप्रसिद्धार्थस्य कृत्रिमार्थस्य च ग्रहणं, सा अन्वितानन्वितार्थसंज्ञा। तथाहि – "बहुगणवतुडति संख्या"[1] इति सूत्रेण विधीयमानया संख्यासंज्ञया लोकप्रसिद्धसंख्यावाचिनां ग्रहणम्। तद्वदेव बहुगणशब्दयोः वतुडतिप्रत्ययान्तानाञ्च कृत्रिमाणामपि ग्रहणम्। तदुक्तं भाष्ये – "लघ्वर्थं हि संज्ञाकरणम्। तत्र महत्याः संज्ञायाः करण एतत्प्रयोजनम – अन्वर्थसंज्ञा यथा विज्ञायेत – संख्यायते अनया संख्येति। एकादिकया चापि संख्यायते।"[1] प्रकृतभाष्ये कैयटेन चाप्युक्तम् – "इहान्वर्थसंज्ञाकरणेन तावदनुरूपः संज्ञी सर्व आक्षिप्यते। तेनैकादीनां तावद् ग्रहणं भवति, पश्चात् बहुगणवतुडतीति भूर्यादिनिवृत्त्यर्थं नियमार्थं व्याख्यायते। अत एव संघवैपुल्यवृत्त्योर्बहुगणशब्दयोः संज्ञा न भवति'' इति।

1.4. अर्थनिबन्धनसंज्ञा

यस्यास्संज्ञायाः यौगिकार्थेन सह साक्षात्सम्बन्धः, सा अर्थनिबन्धनसंज्ञा। अर्थेन निबन्धनं = सम्बन्धो यस्याः सा इत्यर्थः। यथा – "अकथितं च"[1] इति अपादानादिभिरनुक्तं कारकं कर्मसंज्ञं स्यादित्यर्थः। उदाहरणम् – देवदत्तः पौरवं गां याचते। अत्र देवदत्तस्य ईप्सिततमा गौः। तस्याश्च कर्मसंज्ञा "कर्तुरीप्सिततमं कर्म"[1] इति सूत्रेणोक्ता। पौरवशब्दस्य तु कर्मसंज्ञा न केनापि कथिता। अतस्तस्य कर्मसंज्ञाया अकथितत्वात् "अकथितं च'' इति सूत्रेण कर्मसंज्ञा, तन्निमित्तिका द्वितीया विभक्तिश्च सिद्ध्यति। एवञ्चानेन सूत्रेण विधीयमानायाः कर्मसंज्ञायाः अकथितमिति यौगिकार्थेन साक्षात् सम्बन्धः, न तु "कर्तुरीप्सिततमं कर्म'' इति कृत्रमार्थेन।

1.5 संज्ञासूत्राणां वैशिष्ट्यम्

संज्ञासूत्राणि उपदेशदेशात् विधिदेशं प्राप्य वाक्यैकवाक्यतया अर्थं प्रकाशयन्ति। यथा – "वृद्धिरादैच्'' इति संज्ञासूत्रं "मृजेर्वृद्धिः"[1] इति विधिसूत्रोपदेशदेशं प्राप्य उपजीव्योपजीवकभावसंबन्धेन तत्सूत्रेण सह अन्वेति। अत्र "मृजेर्वृद्धिः" इति विधिसूत्रस्य "वृद्धिरादैच्'' इति संज्ञासूत्रम् उपकारकम्। यतः तत्साहाय्येनैव "मृजेर्वृद्धिः" इति सूत्रं वृद्धिरूपार्थबोधने समर्थम्। अतोऽत्र संज्ञासूत्रमुपजीव्यम्। विधिसूत्रन्तु उपकार्यत्वात् उपजीवकम्। उपजीवयत्युपजीव्यम्, उपजीवत्युपजीवकम् इति तयोरर्थः। तदुक्तं भाष्ये –"एवं तर्हि परैव प्रगृहसंज्ञा। कथम् ? 'कार्यकालं संज्ञापरिभाषम्' यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम्। 'प्रगृह्यः प्रकृत्या' इत्युपस्थितमिदं भवति अदसो मात्"[1] इति।

2. परिभाषासूत्राणि

अनियमे नियमकारकं परिभाषासूत्रम्। सूत्रैर्विधीयमानेषु कार्येषु प्राप्यमाणामव्यवस्थां स्वीयनियमैः सूत्राणि यानि निरुन्धन्ति, तानि परिभाषासूत्राणि। यथा 'भविता' इत्यत्र अस् धातोः आर्धधातुकविषये "अस्तेर्भूः''[1] इति सूत्रेण भू इत्यादेशो विधीयते। किन्त्वयमादेशः नियमाभावात् किंस्थानिकः स्यादिति सन्देहः। तदा "षष्ठी स्थानेयोगा''[1] इति सूत्रमुपस्थाय "इह शास्त्रे या षष्ठी अनियतयोगा श्रूयते सा स्थाने योगैव भवती''त्यमुमर्थं बोधयति। षष्ठ्या विभक्त्या निर्दिष्टस्य स्थाने प्रथमया विभक्त्या निर्दिष्टं कार्यं प्रवर्तत इति सरलोऽर्थः। एतावता 'अस्तेः' स्थाने 'भू' इत्यादेशः सिद्धः। अथाप्यत्र सन्देहः किमयमादेशः कृत्स्नस्य अस्तेः स्थाने प्रवर्तत आहोस्विदेकदेशस्य इति। तदा "अनेकाल्शित् सर्वस्य''[1] इति परिभाषासूत्रमुपतिष्ठते। अनेकाल् (अनेके अलः यस्मिन्) य आदेशः शिच्च सः सर्वस्य षष्ठीनिर्दिष्टस्य स्थाने भवतीत्यर्थः। एवञ्चाभ्यां सूत्राभ्यां नियतः सन् 'भू' इत्ययमादेशः षष्ठीनिर्दिष्टस्य सर्वस्यास्तेः स्थाने प्रवर्त्तते।

परिभाषासूत्राणां वैशिष्ट्यम्

अस्त्यन्यदप्यस्य परिभाषासूत्रस्य वैशिष्ट्यं यदिदं ग्रन्थे विद्यमाने उपदेशस्थले स्थित्वैव यत्र यत्रास्य प्रासङ्गिकता, तत्र तत्र स्वयमेवार्थतोऽन्वेति। यथा देहलीस्थः प्रदीपः सुप्रज्वलितः एकत्र स्थित्वैव कृत्स्नं प्रकोष्ठं प्रकाशयति। तदुक्तं भाष्ये – "परिभाषा पुनरेकदेशस्था सती कृत्स्नं शास्त्रमभिज्वलयति प्रदीपवत्। तद्यथा प्रदीपः सुप्रज्वलित एकदेशस्थः सर्वं वेश्माभिज्वलयति।"[1] उद्योतकृता नागेशेन चायं विषय इत्थं श्लोकितः –

एकदेशस्थिता शास्त्रभवने याति दीपताम्।
परितो व्यापृतां भाषां परिभाषां प्रचक्षते।।

3. विधिसूत्राणि

अप्राप्तप्रापकं सूत्रं विधिसूत्रम्। संज्ञासूत्रादिप्रकारभिन्नेन येन सूत्रेण व्याकरणशास्त्रदृष्ट्या नूतनतया कश्चन प्रत्ययः, आदेशः, आगमः, किञ्चित्सन्ध्यादिकार्यं वा विधीयते, तद् विधिसूत्रम्।

क. प्रत्ययविधायकं यथा - "अत इञ्"[1] इति सूत्रेण 'दशरथ' इति अदन्तात्प्रातिपदिकात् अपत्यार्थे इञ्प्रत्यये 'दाशरथिः' इति सिद्ध्यति। अतः इदं प्रत्ययविधायकं सूत्रम्।

ख. आदेशविधायकं यथा - 'पच्+अ+ति' इति स्थिते "एरुः"[1] इति सूत्रेण लोट्स्थानिकतेरवयवस्य इकारस्य उकारादेशो विधीयते। तेन पचतु इत्यादि सिद्ध्यति। एवञ्चेदमादेशविधायकं सूत्रम्।

ग. आगमविधायकं यथा – 'कर्+स्य+ति' इति स्थिते "आर्धधातुकस्येड् वलादेः"[1] इति सूत्रेण वलादेरार्धधातुकप्रत्ययस्य इडागमे षत्वे च 'करिष्यति' इति रूपम्। इदञ्चागमविधायकं सूत्रम्।

घ. सन्धिविधायकं यथा – "इको यणचि"[1] इति सूत्रेण इकः स्थाने उत्सर्गतया यणादेशो विधीयते अचि परे। उदाहरणे – दध्यत्र, मध्वत्र।

अस्मिन्नेव विधिसूत्रप्रकारे उत्सर्गापवादपद्धतिराश्रीयते। यदि तु अकः परः सवर्णः अज्भवति, तदा "अकः सवर्णे दीर्घः"[1] इति सूत्रेण यणः अपवादतया पूर्वपरयोः स्थाने दीर्घो विधीयते। उदाहरणम् - दधीन्द्रः। यद्यप्यत्र दधि+इन्द्रः इति स्थिते इकारस्य इकारेऽचि परे उत्सर्गतया यणादेशः प्राप्तस्तथापि सवर्णे अचि परे दीर्घादेशस्य तदपवादतया विधानात्सैव प्रवर्त्तते।

4. नियमसूत्राणि

सूत्रविशेषेणैव तत्तत्कार्ये सिद्धे पुनस्तदेव कार्यं येन विधीयते, तन्नियमसूत्रम्। तदुक्तम् – "सिद्धे सत्यारभ्यमाणो हि विधिर्नियमाय कल्पते।" यथा "शेषो घ्यसखि"[1] इति सूत्रेण ह्रस्वमिवर्णोवर्णान्तं यन्न स्त्र्याख्यं, स्त्र्याख्यं च यन्न नदीसंज्ञकम्, तस्य घिसंज्ञा विधीयते। यथा - अग्निना इत्यादौ अग्नि+टा इति स्थिते "आङो नास्त्रियाम्"[1] इति सूत्रेण टा स्थाने घिसंज्ञानिमित्तके ना इत्यादेशे अग्निना इति सिद्ध्यति। एवं सति पतिशब्दस्यापि घिसंज्ञायां शिष्टैरप्रयुज्यमानं पतिना इत्यनिष्टं रूपमापद्येत। ततः सूत्रकारेणैव "पतिः समास एव"[1] इति नियमः कृतः। पतिशब्दस्य यदि घिसंज्ञा तर्हि समासे एव। तेनात्र घिसंज्ञाया अभावे पति टा इति स्थिते अनुबन्धलोपे यणादेशे च 'पत्या' इत्यभीष्टं रूपं सिद्ध्यति। समासे तु गृहपतिना, प्रजापतिना इत्येव।

5. अतिदेशसूत्राणि

तत्तुल्यतासंपादकसूत्रम् अतिदेशसूत्रम्। अर्थात् तद्विशिष्टधर्माभाववति तद्विशेषधर्मारोपः येन सूत्रेण अतिदिश्यते = आरोप्यते, तदतिदेशसूत्रम्। तद्यथा "स्थानिवदादेशोऽनल्विधौ"[1] इति सूत्रेण स्थानिनि

विद्यमाना धर्मा आदेशे अतिदिश्यन्ते। तथाहि रामाय इत्यादौ राम + ङे इति स्थिते "ङेर्यः"[1] इति सूत्रेण ङे इत्यस्य स्थाने य इत्ययमादेशो विहितः। तथा च राम + य इति स्थिते "सुपि च"[1] इति सूत्रेण यञादौ सुपि परे अकारान्तस्याङ्गस्य दीर्घः विधीयते। किन्त्वत्र ङे इति यः स्थानी (यस्य स्थाने आदेशो विधीयते सः स्थानी) तत्स्थाने विहितस्य यादेशस्य सुप्प्रत्ययत्वं नास्ति; "स्वौजस्---"[1] इत्यादिप्रत्ययेषु तदभावात्। तदा प्रकृतसूत्रेण स्थानिनि विद्यमानस्य धर्मस्य = सुप्त्वस्य य इत्यादेशे आरोपिते तस्यापि सुप्त्वात् "सुपि च" इति सूत्रेण दीर्घे रामाय इति सिद्ध्यति।

6. अधिकारसूत्राणि

अधिकारसूत्रस्य लक्षणं सूत्रकारेणैवेत्थं सूत्रितं "स्वरितेनाधिकारः"[1] इति। स्वरितचिह्नेन युक्तं सूत्रमधिकारसूत्रमित्यर्थः। "प्रतिज्ञास्वरिताः पाणिनीयाः" इति वचनानुसारं पाणिनीयैः यस्य सूत्रस्य स्वरितत्वं परम्परया प्रतिज्ञायते तयैव तत्तत्सूत्राणाम् अधिकारसूत्रत्वं निश्चीयते। यथा "अङ्गस्य"[1], "प्रत्ययः"[1], "धातोः"[1], इत्यादीनि।

परिभाषाधिकारसूत्रयोर्भेदः

परिभाषासूत्रं यथा उपदेशदेशे स्थित्वैव कृत्स्नं शास्त्रं नियमयति, न तथा अधिकारसूत्रम्। तत्तु यत्सूत्रपर्यन्तं तस्याधिकारो निर्धार्यते, तत्सूत्रपर्यन्तं प्रत्येकमुपतिष्ठते। तदुक्तं भाष्ये – "अधिकारो हि योगे योगे उपतिष्ठते इति"[३६]। यथा अङ्गस्य इत्यधिकारसूत्रं षष्ठाध्यायस्य चतुर्थपादे प्राथम्येन पठितम्। अयञ्चाधिकारः सप्तमाध्यायपरिसमाप्तिपर्यन्तमधिकृतः। अतस्तत्सूत्रमारभ्य सप्तमाध्यायस्य अन्तिमसूत्रं यावत् पठितेषु सर्वेष्वपि सूत्रेषु अङ्गस्य इत्यस्य आवृत्तिः क्रियते। यथा "अतो दीर्घ यञि"[1] इति सूत्रे अङ्गाधिकारस्य सत्त्वात् अदन्तस्याङ्गस्य इत्याद्यर्थो निष्पद्यते।

7. निषेधसूत्राणि

कार्यावरोधकं सूत्रं निषेधसूत्रम्। केनचित् सूत्रेण प्राप्तस्य कार्यस्य अवरोधो येन क्रियते, तन्निषेधसूत्रम्। यथा "ज्ञाश्रुस्मृदृशां सनः"[1] इति सूत्रेण सन्प्रत्ययान्तात् ज्ञाधातोः आत्मनेपदं विधीयते। यथा धर्मं जिज्ञासते। एवं स्थिते अनु इत्युपसर्गपूर्वकात् सन्नन्तात् ज्ञाधातोः पूर्वसूत्रेण आत्मनेपदे प्राप्ते "नानोर्ज्ञः"[1] इति सूत्रेण निषिध्यते। तदा पुत्रम् अनुजिज्ञासति इति परस्मैपदमेव।

8. विभाषासूत्राणि

कार्यस्य विकल्पकारकं सूत्रं विभाषासूत्रम्। सूत्रविशेषेण प्राप्तस्य कार्यस्य सकृत् विधानं सकृन्निषेधश्च येन सूत्रेण विधीयते, तद् विभाषासूत्रम्। "न वेति विभाषा"[1] इति सूत्रेण निषेधविकल्पार्थयोर्विभाषासंज्ञा विधीयते। सा च विभाषा अप्राप्तप्राप्तोभयत्रभेदेन त्रिधा।

8.1 अप्राप्तविभाषा

येन सूत्रेण पूर्वमप्राप्तस्य कार्यस्य विकल्पेन विधानं क्रियते, तदप्राप्तविभाषासूत्रम्। यथा "अनुपसर्गाद्वा"[1] उपसर्गरहितात् क्रमधातोरात्मनेपदं विकल्पेन भवतीति सूत्रार्थः। उदाहरणे - क्रमते, क्रामति। एतत्प्राग्वर्तिभिस्सूत्रैः वृत्यादिष्वर्थेषु विशिष्टोपसर्गयुक्तादेव क्रमधातोरात्मनेपदं विहितम्। उपसर्गरहितात् क्रमधातोरात्मनेपदं तु न केनचित् पूर्वसूत्रेण प्राप्तम्। अतस्तत्र अप्राप्तस्य आत्मनेपदस्य विकल्पेन विधानात् अप्राप्तविभाषासूत्रमिदम्।

8.2 प्राप्तविभाषा

पूर्वसूत्रप्राप्तस्य कस्यचित् कार्यस्य विकल्पेन विधानं येन सूत्रेण क्रियते, तद् प्राप्तविभाषासूत्रम्। यथा "विभाषा विप्रलापे"[1]। विप्रलापात्मके व्यक्तवाचां समुच्चारणे वर्तमानाद्रुदतेरात्मनेपदं भवति विभाषा इति सूत्रार्थः। अत्र विप्रलापो नाम विवादः। उदाहरणे - विप्रवदन्ते सांवत्सराः विप्रवदन्ति सांवत्सराः। "व्यक्तवाचां समुच्चारणे"[1] इति पूर्वसूत्रेणैव प्राप्तस्यात्मनेपदस्य विप्रलापार्थे "विभाषा विप्रलापे" इति सूत्रेण विकल्पेन विधानम्। एवञ्च प्राप्तस्यैव आत्मनेपदस्य विकल्पविधानात् प्राप्तविभाषासूत्रमिदम्।

8.3 उभयत्रविभाषा

येन सूत्रेण कस्मिंश्चिल्लक्ष्ये पूर्वतः प्राप्तस्य कार्यस्य अप्राप्तस्य च विकल्पेन विधानं तदुभयत्रविभाषासूत्रम्। यथा "विभाषा श्वेः"[1] लिट्लकारे यङ् प्रत्यये च परे श्वयतेर्धातोः विभाषासम्प्रसारणं भवतीति सूत्रार्थः। उदाहरणानि (लिटि) शुशाव, शिश्वाय। शुशुवतुः शिश्वियतुः। (यङि) शोशूयते, शेश्वीयते। अत्र श्विधातोः क्ङिति लिटि परे "वचिस्वपियजादीनां किति"[1] इति सूत्रेण नित्ये संप्रसारणे प्राप्ते यङ्गन्तस्य श्विधातोश्च केनापि सूत्रेण संप्रसारणे अप्राप्ते सूत्रेणानेन उभयत्र विकल्पेन संप्रसारणस्य विधानात् उभयत्रविभाषासूत्रमिदम्। तदुक्तं काशिकायां- "तदत्र यङि संप्रसारणमप्राप्तं विभाषा विधीयते। लिटि तु किति यजादित्वात् नित्यं प्राप्तं तत्सर्वत्र विकल्पेन भवतीत्युभयत्र विभाषा"[1] इति।

9. निपातनसूत्राणि

कल्पितप्रकृतिप्रत्ययादिप्रयोगकं सूत्रं निपातनसूत्रम्। यस्य शब्दस्य कल्पितप्रकृतिप्रत्ययादिप्रयोगपूर्वकं निष्पन्नं रूपम् एकेनैव सूत्रणोपदिश्यते, तन्निपातनसूत्रम्। यथा "पश्चात्"[1], अत्र अपरस्यां दिशि इत्यर्थे अपरशब्दस्य पश्चभावः आतिश्च प्रत्यय ऊहितः। ततः आतेः इकारस्य इत्संज्ञायां लोपे सवर्णदीर्घे च पश्चात् इति शब्दो निष्पन्नः। एवञ्चात्र अपरशब्दस्य पश्चादेशविधानाय नूतनतया सूत्ररचना न कर्तव्येति लाघवं भवति।

अनया रीत्या सूत्रकारः स्वया ऋतम्भरप्रज्ञया अष्टाध्यायीस्थसूत्राणि नवसु वर्गेषु विभज्य तेषु परस्परसहकारित्वमुत्पाद्य लक्षशः, कोटिशः, अनन्तशश्च साधुशब्दान् अनुशाशास।

सन्दर्भाः -

1. अष्टा. १.१.१
2. अष्टा. १.१.२
3. अष्टा. १.१.२६
4. अष्टा. ७.१.१४
5. म.भा. १.१.२६
6. अष्टा. १.४.३
7. अष्टा. ७.३.११२
8. अष्टा १.१.२२
9. म.भा. १.१.२६
10. अष्टा. १.४.५१
11. अष्टा. १.४.४९
12. अष्टा. ७.२.११४
13. म.भा. १.१.१२
14. अष्टा. २.४.५२
15. अष्टा. १.१.४८
16. अष्टा. १.१.५४
17. म.भा.२.१.१
18. अष्टा. ४.१.९५
19. अष्टा. ३.४.८६
20. अष्टा. ७.२.३५
21. अष्टा. ६.१.७४
22. अष्टा. ६.१.९६
23. अष्टा. १.४.७
24. अष्टा. ७.३.११९

25. अष्टा. १.४.८
26. अष्टा. १.१.९५
27. अष्टा. ७.१.१३
28. अष्टा ७.३.१०२
29. अष्टा. ४.१.२
30. अष्टा. १.३.११
31. अष्टा. ६.४.१
32. अष्टा. ३.१.१
33. अष्टा. ३.१.९१
34. अष्टा. ७.३.१०१
35. अष्टा. १.३.५७
36. अष्टा. १.३.५८
37. अष्टा. १.१.४३
38. अष्टा. १.३.४३
39. अष्टा. १.३.५०
40. अष्टा. १.३.४८
41. अष्टा. ६.१.३०
42. अष्टा. ६.१.१५
43. काशिका. ६.१.३०
44. अष्टा. ५.३.३२